# Shri Kamakshi Panchashati Stotram

# શ્રીકામાક્ષીપઞ્ચશતીસ્તોત્રમ્

## Document Information

Text title : kAmAkShIpanchashatIstotram

File name : kAmAkShIpanchashatIstotram.itx

Category : devii, devI, panchashatI, shatI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : See corresponding nAmAvaliH

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 8, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીકામાક્ષીપઞ્ચશતીસ્તોત્રમ્

(નામસારસ્તવઃ)

કદાચિત્કમલા નાથં કમલાયતલોચનમ્ ।
પપ્રચ્છ કરુણારાશિં પ્રણમ્ય શિરસા મુહુઃ ॥ ૧॥

મન્નાથ કિં ત્વયા નિત્યં જપ્યતે દૃઢભક્તિતઃ ।
તન્મે બ્રૂહિ મયિ પ્રીતિર્યદ્યસ્તિ મધુસૂદન ॥ ૨॥

ઇતિ પૃષ્ટઃ શ્રિયા વિષ્ણુરુવાચ કમલાં હસન્ ।
ઇતઃ પરં પ્રવક્ષ્યામિ રહસ્યમપિ તે પ્રિયે ॥ ૩॥

શ્રીકામાક્ષ્યાઃ પઞ્ચશતી નામ્નાં સઙ્કીર્ત્યતેઽનિશમ્ ।
રહસ્યાતિરહસ્યૈષા ગોપનીયા વિશેષતઃ ॥ ૪॥

દર્શનીયા ન કસ્મૈચિત્ પ્રદેયોપાસકાય વૈ ।
કામાક્ષીનામકોશેષુ સારમાદાય શક્તિભિઃ ॥ ૫॥

રચિતેયં પઞ્ચશતી કામાક્ષીપ્રીતિસિદ્ધયે ।
તામેવ કથયામ્યદ્ય નામસારોદ્ભવાં પ્રિયે ॥ ૬॥

એતદ્રહસ્યં પરમં કામાક્ષીપ્રીતિદાયકમ્ ।
ભોગમોક્ષપ્રદં નૃણાં સામ્રાજ્યાદિફલપ્રદમ્ ॥ ૭॥

સહસ્રનામ ત્રિશતી શ્રીમત્પઞ્ચશતી તથા ।
ત્રયમેતન્મહારાજ્ઞ્યા નેત્રત્રયમિતીર્યતે ॥ ૮॥

સર્વેષુ લલિતાસ્તોત્રકોશપાઠેષુ યત્ફલમ્ ।
તસ્માચ્છતગુણં પુણ્યં પ્રાપ્નોત્યસ્યાઃ પ્રકીર્તનાત્ ॥ ૯॥

પદ્માસનં સમાબધ્ય વીરાસનમથાપિ વા ।
નાસાગ્રન્યસ્તનયનો મનઃ પઞ્ચેન્દ્રિયૈઃ સહ ॥ ૧૦॥

સ્વવશીકૃત્ય મતિમાન્બહિર્વ્યાપારમસ્મરન્ ।

દેવતાં પુરતો ધ્યાત્વા યથાવિભવમઞ્જસા ॥ ૧૧॥

તતો જપેત્સમાધિસ્થો મન્ત્રાઃ સિદ્ધ્યન્તિ મન્ત્રિણઃ ।
અથવા મનસિ ધ્યાત્વા સહસ્રદલપઙ્કજમ્ ॥ ૧૨॥

તન્મધ્યે કર્ણિકાં ધ્યાત્વા ક્રોશમાત્રં સુવિસ્તૃતમ્ ।
સિંહાસનં ચ તન્મધ્યે નવરત્નવિચિત્રિતમ્ ॥ ૧૩॥

તસ્યોપરિ ચ કામાક્ષીઞ્ચિન્તયેત્કોમલાકૃતિમ્ ।
પૂર્વસ્માદધિકં હ્યેતદ્ધ્યાનમાભ્યન્તરં પ્રિયે ॥ ૧૪॥

મુનીન્દ્રૈરપિ સંસેવ્યં ભોગમોક્ષૈકસાધનમ્ ।
ગુહ્યાદ્ગુહ્યં તવ સ્નેહાદ્વચ્મિ ધ્યાનં મમ પ્રિયે ॥ ૧૫॥

યોગિનામપ્યલભ્યં તન્માતુસ્તુષ્ટિકરં ક્ષણાત્ ।
યત્ર કુત્ર સ્થિતો વાપિ શ્રીવિદ્યામન્ત્રવિન્નરઃ ॥ ૧૬॥

હૃદયે રત્નવસુધાં સુધાસાગરસંવૃતામ્ ।
કલ્પોદ્યાનકદમ્બદ્રુહેમામ્ભોરુહશોભિતામ્ ॥ ૧૭॥

ધ્યાત્વા તત્રૈવ સદનઞ્ચિન્તામણિવિરાજિતમ્ ।
તસ્મિન્ ચિન્તામણિગૃહે સિંહાસનવરે સ્થિતામ્ ॥ ૧૮॥

કામાક્ષીમાત્મનિ ધ્યાયેત્ સા સોઽહમિતિ નિશ્ચલઃ ।
એવં યઃ કુરુતે ધ્યાનં પશ્યન્નાત્માનમાત્મના ॥ ૧૯॥

તસ્યૈવ પુરતઃ સાપિ સાન્નિધ્યં કુરુતે ક્ષણાત્ ।
આત્માનં તન્મયં ધ્યાત્વા યસ્તુ વિદ્યાં જપેન્નરઃ ॥ ૨૦॥

વિદ્યા તસ્ય વિશાલાક્ષિ તત્ક્ષણાદેવસિદ્ધ્યતિ ।
તસ્માત્તથૈવ કામાક્ષીં ધ્યાત્વા પશ્ચાદિમાં સ્તુતિમ્ ॥ ૨૧॥

જપેદખિલપાપૌઘશાન્તયે શાન્તમાનસઃ ।
નામાનિ તાનિ વક્ષ્યામિ શ◌ૃણુ સુન્દરિ ભક્તિતઃ ॥ ૨૨॥

અચિન્તયન્ વયોલિઙ્ગવર્ણભેદમતન્દ્રિતઃ ।
યાનિ જપ્ત્વા મહામોહાન્મુક્તઃ સાયુજ્યમાપ્નુયાત્ ॥ ૨૩॥

વિનિયોગઃ -
અથ અસ્ય શ્રીકામાક્ષીપઞ્ચશતીસ્તોત્રમહામન્ત્રસ્ય
મન્ત્રિણ્યાદિ શક્તયઃ ઋષયઃ, અનુષ્ટુપ્છન્દઃ, શ્રીકામાક્ષી દેવતા,

ॐ ઐં વાગ્ભવકૂટેન બીજં, શ્રીકામાક્ષ્યૈ ક્લીં મધ્યકૂટેન શક્તિઃ,
નમઃ સૌઃ શક્તિકૂટેન કીલકં, મમ શ્રીકામાક્ષીપ્રસાદસિદ્ધ્યર્થે
નામપારાયણે જપે વિનિયોગઃ ॥

કરન્યાસઃ -
ॐ કાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ॐ કીં તર્જનીભ્યાં નમઃ ।
ॐ કૂં મધ્યમાભ્યાં નમઃ । ॐ કૈં અનામિકાભ્યાં નમઃ ।
ॐ કૌં કનિષ્ઠિકાભ્યાં નમઃ । ॐ કઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
ॐ કાં હૃદયાય નમઃ । ॐ કીં શિરસે સ્વાહા ।
ॐ કૂં શિખાયૈ વષટ્ । ॐ કૈં કવચાય હુમ્ ।
ॐ કૌં નેત્રત્રયાય વૌષટ્ । ॐ કઃ અસ્ત્રાય ફટ્ ।
ॐ ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્-
કામાક્ષીં કારણપરચિદ્રૂપાં કરુણાત્મિકામ્ ।
કાઞ્ચીક્ષેત્રગતાં ચન્દ્રકલાલઙ્કૃતશેખરામ્ ॥

કલ્હારોલ્લાસિચિકુરાં કર્ણાન્તાયતલોચનામ્ ।
મન્દસ્મેરાઞ્ચિતમુખીં તપનોડુપકુણ્ડલામ્ ॥

કમ્બુકણ્ઠીં ઘનકુચાં મુક્તામાલાશતાવૃતામ્ ।
લમ્બવામકરામ્ભોજાં દક્ષહસ્તલસચ્છુકામ્ ॥

અદૃશ્યમધ્યામરુણચેલામબ્જપદોજ્જ્વલામ્ ।
સચામરરમાવાણીસેવિતાંશ્રિતવત્સલામ્ ॥

સુવર્ણતનુમેકામ્રનાયકોત્સઙ્ગવાસિનીમ્ ।
ધ્યાયામિ વરદાં દેવીં સદાનન્દસ્વરૂપિણીમ્ ॥

માનસિકપઞ્ચોપચારપૂજા -
ॐ લં પૃથિવ્યાત્મિકાયૈ શ્રીકામાક્ષ્યૈ ગન્ધં કલ્પયામિ ।
ॐ હં આકાશાત્મિકાયૈ શ્રીકામાક્ષ્યૈ પુષ્પાણિ કલ્પયામિ ।
ॐ યં વાય્વાત્મિકાયૈ શ્રીકામાક્ષ્યૈ ધૂપં કલ્પયામિ ।
ॐ રં અનલાત્મિકાયૈ શ્રીકામાક્ષ્યૈ દીપં કલ્પયામિ ।
ॐ વં અમૃતાત્મિકાયૈ શ્રીકામાક્ષ્યૈ અમૃતનિવેદનં કલ્પયામિ ।

ૐ સં સર્વાત્મિકાયૈ શ્રીકામાક્ષ્યૈ સર્વાનુપચારાન્ કલ્પયામિ ॥

અથ સ્તોત્રમ્ ।

ૐ કામાક્ષી કરુણામૂર્તિઃ કલ્યાણગિરિમન્દિરા ।
ચિદગ્નિજાતા ચિદ્રૂપા શ્રિતસંરક્ષણોદ્યતા ॥ ૧॥

બાલાર્કકોટિરુચિરવપુસ્સન્નદ્ધયૌવના ।
આઘૃષ્ટપદ્મરાગાશ્મનિષ્પન્નમકુટોજ્જ્વલા ॥ ૨॥

સ્ફુરચ્ચન્દ્રકલાક્લૃપ્તચૂડાપીડવિરાજિતા ।
સીમન્તરેખારચિતસિન્દૂરશ્રેણિમઞ્જુલા ॥ ૩॥

સ્ફુરત્કસ્તૂરિતિલકકન્દલન્નીલકુન્તલા ।
કદમ્બમઞ્જરિલસત્કર્ણપૂરમનોહરા ॥ ૪॥

ભ્રૂવલ્લીસ્મરકોદણ્ડસાયકીભૂતલોચના ।
માર્તાણ્ડમણ્ડલાકારરત્નકુણ્ડલમણ્ડિતા ॥ ૫॥

વિશઙ્કટારાલકેશકર્ણિકાકોશનાસિકા ।
લસન્મુક્તામણિભ્રાજન્નાસાભરણભાસુરા ॥ ૬॥

કસ્તૂરીક્લૃપ્તમકરિકાદિરાજત્કપોલભૂઃ ।
લાક્ષાલક્ષ્મીનિર્વ્યપેક્ષપાટલોષ્ઠપુટાઞ્ચિતા ॥ ૭॥

કુન્દકોરકસશ્રીકદન્તપઙ્ક્તિવિરાજિતા ।
અતર્ક્યૌપમ્યચુબુકા મુગ્ધસ્મેરમુખામ્બુજા ॥ ૮॥

નિતમ્બલમ્બમાનત્રિવેણીચૂલાત્તછાલિકા ।
શિરીષકોમલભુજવિભ્રાજત્કનકાઙ્ગદા ॥ ૯॥

લમ્બવામકરામ્ભોજા દક્ષહસ્તલસચ્છુકા ।
નાનામણીગણલસત્સુવર્ણકૃતકઙ્કણા ॥ ૧૦॥

પાશાઙ્કુશધનુર્બાણલસત્પાણિતલોજ્જ્વલા ।
રત્નાઙ્ગુલીયસન્દોહરમણીયકરાઙ્ગુલિઃ ॥ ૧૧॥

લોલચિન્તાકપદકમુક્તાવલિલસદ્ગલા ।
ગન્ધકસ્તૂરિકર્પૂરકુઙ્કુમાલઙ્કૃતસ્તના ॥ ૧૨॥

સ્તનભૂધરસન્નદ્ધસોપાનત્રિવલીયુતા ।
નવીનરોમલતિકાજિતકાદમ્બિનીદ્યુતિઃ ॥ ૧૩॥

અર્ધોરુકગ્રન્થિલસદ્રત્નકાઞ્ચીગુણાન્વિતા ।
સૌન્દર્યપૂરવિલસદાવર્તાયિતનાભિકા ॥ ૧૪॥

જપાકુસુમસચ્છાયપટ્ટાંશુકપરીવૃતા ।
જઘનાભોગસુભગપૃથુશ્રેણીભરાલસા ॥ ૧૫॥

એકામ્રનાયકોત્સઙ્ગકામ્યોરુમહિમોચ્છ્રયા ।
કરીન્દ્રકુમ્ભકઠિનજાનુદ્વયવિરાજિતા ॥ ૧૬॥

સ્મરકાણ્ડીરતૂણીરસમ્પ્રદાયકજઙ્ઘિકા ।
સ્ફુરન્માણિક્યમઞ્જીરરઞ્જિતાઙ્ઘ્રિસરોરુહા ॥ ૧૭॥

કમઠીકર્પરતટીકઠોરપ્રપદાન્વિતા ।
યાવકશ્રીનિર્વ્યપેક્ષપાદ લૌહિત્યવાહિની ॥ ૧૮॥

હરીન્દ્રમુખકોટીરતટીઘટિતપાદુકા ।
સૌન્દર્યલહરીસીમસર્વાવયવપાટલા ॥ ૧૯॥

મરાલીલાલિતગતિઃ રામણીયકશેવધિઃ ।
સર્વશ‍ૃઙ્ગારવેષાઢ્યા સર્વાવગુણવર્જિતા ॥ ૨૦॥

મોહિતાશેષજગતી મોહિનીરૂપધારિણી ।
મહામાયી પરાશક્તિર્મદિરારુણલોચના ॥ ૨૧॥

સમ્પત્કરી મહાસેનાસમૃધ્દા સમ્પદુન્નતા ।
અનેકકોટિદૈત્યેન્દ્રગર્વનિર્વાપણોલ્બણા ॥ ૨૨॥

ચક્રરાજરથારૂઢચક્રિણી ચક્રનાયિકા ।
મન્ત્રિણીસેવિતપદા મન્ત્રતન્ત્રાધિદેવતા ॥ ૨૩॥

અશ્વારૂઢા સમારાધ્યા વિશ્વાતીતા વિરાગિણી ।
બાલાસમેતા ત્રિપુરા કાલાતીતા કલાવતી ॥ ૨૪॥

દણ્ડનાથસમાસેવ્યા ભણ્ડાસુરવધોદ્યતા ।
કામરાજપ્રિયા કામસઞ્જીવનમહૌષધિઃ ॥ ૨૫॥

બ્રહ્માદિદૈવતારાધ્યા બ્રહ્મવિદ્યા બૃહત્તનૂઃ ।
ચાપિની ચન્દનાલિપ્તા ચન્દ્રવિદ્યા પરાઙ્કુશા ॥ ૨૬॥

મનુવિદ્યા મહારાજ્ઞી મહાવિદ્યા મહીયસી ।

સિંહાસનેશી સિન્દૂરરુચિઃ સૂર્યાભિવન્દિતા ॥ ૨૭॥

સુન્દરી સુદતી સુભ્રૂર્વન્દારુજનવત્સલા ।
સમાનાધિકશૂન્યાર્ઘા સકલાર્થપ્રદાયિની ॥ ૨૮॥

સમ્રાજ્ઞી સાન્દ્રકરુણા સનકાદિમુનિસ્તુતા ।
મહાદેવી મહેશાની મહેશ્વરપતિવ્રતા ॥ ૨૯॥

લોપામુદ્રાગસ્ત્યનુતા લોભઘ્ની લોભવર્જિતા ।
પાવની પશુપાશઘ્ની પશ્યન્તી પરમેશ્વરી ॥ ૩૦॥

કદમ્બકલિકોત્તંસા કામેશી કામપૂજિતા ।
નન્દિવિદ્યાऽઽનન્દમયી નીલસ્નિગ્ધાબ્જલોચના ॥ ૩૧॥

કલ્યાણી કામરહિતા કામદા કામકોટિકા ।
ચરાચરજગદ્ધાત્રી ચન્દ્રિકા ચન્દ્રવર્તિની ॥ ૩૨॥

શિરીષસુકુમારાઙ્ગી શિતિકણ્ઠપ્રિયા શિવા ।
અનઙ્ગવલ્લભાऽનઙ્ગશાસ્ત્રસિદ્ધાન્તમઞ્જરી ॥ ૩૩॥

કુબેરવિદ્યા કુલજા કુરુકુલ્લા કુલેશ્વરી ।
કુલાઙ્ગના ત્રિકૂટસ્થા કુરઙ્ગાङ્કકલાધરા ॥ ૩૪॥

દુર્વાસઃપૂજિતા દુઃખહન્ત્રી દુર્મતિદૂરગા ।
આમ્નાયનાથા નાથેશી સર્વામ્નાયનિવાસિની ॥ ૩૫॥

સર્વારુણા સઙ્ગહીના સાવિત્રી સર્વતોમુખી ।
બ્રહ્મ ગીતા બ્રહ્મ મયી બ્રહ્માનન્દરસાત્મિકા ॥ ૩૬॥

નિરામયા નિરાનન્દા નિર્દ્વન્દ્વા નિરહઙ્કૃતિઃ ।
નિગમાદૃષ્ટચરણા નિરાધારા નિરીશ્વરી ॥ ૩૭॥

નિયન્ત્રી નિયતિર્નિત્યા નિરાશા નિરપાયિની ।
અખણ્ડાનન્દભરિતા ખણ્ડત્રયપરિષ્કૃતા ॥ ૩૮॥

કાઞ્ચીક્ષેત્રગતા કામપીઠસ્થા કામપૂજિતા ।
મહાશ્મશાનનિલયા ગાયત્રીમણ્ડપેશ્વરી ॥ ૩૯॥

કૈલાસનાથદયિતા કમ્પાતીરવિહારિણી ।
અવિચ્છિન્નાનન્દમૂર્તિરપ્રમેયાપરાજિતા ॥ ૪૦॥

અગમ્યા ગગનાકારા પ્રકૃતિપ્રત્યયાત્મિકા ।
અવેદ્યા વેદ્યવિજ્ઞાત્રી પઞ્ચકૃત્યપરાયણા ॥ ૪૧ ॥

સૃષ્ટિસ્થિતિક્ષયતિરોધાનાનુગ્રહકારિણી ।
બ્રહ્મગોવિન્દાદિ પઞ્ચપ્રેતમઞ્ચાધિવાસિની ॥ ૪૨ ॥

તમોઽતીતા તમોહન્ત્રી તત્ત્વાતત્ત્વવિવેચિની ।
સર્વતત્ત્વમયી સર્વભૂતિદા સમયપ્રિયા ॥ ૪૩ ॥

જિતાખિલેન્દ્રિયગ્રામમાનસામ્બુજહંસિકા ।
સુરાસુરગણારાધ્યા સદસદ્રૂપિણી સતી ॥ ૪૪ ॥

ચણ્ડિકા ચારુવદના ખણ્ડિતારાતિમણ્ડલા ।
અગસ્ત્યવિદ્યાસંસેવ્યા નન્દિતાશેષવિષ્ટપા ॥ ૪૫ ॥

સંવિત્સત્યમયી સૌમ્યા દુર્નિરીક્ષ્યા દુરત્યયા ।
ત્રિકાલસ્થા ત્રિકોણસ્થા ત્રિમૂર્તિસ્ત્રિગુણાસ્પદા ॥ ૪૬ ॥

યજ્ઞરૂપા યજ્ઞભોક્ત્રી કાર્યાકાર્યવિચક્ષણા ।
નામરૂપાદિરહિતા વામદક્ષાધ્વપૂજિતા ॥ ૪૭ ॥

વિશ્વેશ્વરી વિશ્વવન્દ્યા વિદ્યેશી વેદરૂપિણી ।
આદિમધ્યાન્તરહિતા સર્વશક્તિસ્વરૂપિણી ॥ ૪૮ ॥

અતર્ક્યમૂર્તિરજિતા પ્રધાનાઽતર્ક્યવૈભવા ।
ચિદૂર્મિમાલા સઞ્ચિન્ત્યા ચિન્તિતાર્થપ્રદાયિની ॥ ૪૯ ॥

ચિન્તામણિગૃહાન્તસ્થા ચિત્રકર્મા ચિરન્તની ।
મોહહન્ત્રી મોક્ષદાત્રી મુગ્ધચન્દ્રાવતંસિની ॥ ૫૦ ॥

મુદ્રેશી ન્યસ્તરાજ્યશ્રીર્મૃદુમુગ્ધસ્મિતાનના ।
ક્રોડીકૃતાશેષઘૃણા કોમલાઙ્ગી કુટુમ્બિની ॥ ૫૧ ॥

ષડઙ્ગદેવતાસેવ્યા ષડાનનનમસ્કૃતા ।
શિવારાધ્યા શિવમયીશિવમાયા શિવાઙ્ગા ॥ ૫૨ ॥

ષડૂર્મિહન્ત્રી તરુણી વન્દ્યા ષટ્ચક્રનાયિકા ।
માધવી માધવારાધ્યા માધવીકુસુમપ્રિયા ॥ ૫૩ ॥

બ્રહ્મવિષ્ણ્વાદિ જનની બૃહતી બ્રહ્મવાદિની ।
સઙ્ગીતરસિકા રામા વીણાગાનવિનોદિની ॥ ૫૪ ॥

જ્યોતિર્મયી જગદ્વન્દ્યા જયિની જયદાયિની ।
ભક્તિનમ્રજનાધીના ભક્તાનુગ્રહકારિણી ॥ ૫૫॥

જામદગ્ન્યાર્ચિતા ધૌમ્યપૂજિતા મૂકસન્નુતા ।
ભક્તિગેયા ભક્તિગતા ભક્તક્લેશવિનાશિની ॥ ૫૬॥

ભુક્તિમુક્તિકરી સિદ્ધવિદ્યા સિદ્ધગણાર્ચિતા ।
રાગદ્વેષાદિ રહિતા રાગિણી રાગવર્ધની ॥ ૫૭॥

સામ્રાજ્યદાનનિરતા રતિઃ સુરતલમ્પટા ।
રાજરાજેશ્વરી ધીરા નાસીરમુખભાસુરા ॥ ૫૮॥

ક્ષેત્રેશ્વરી ક્ષેત્રરૂપા ક્ષેત્રજ્ઞા ક્ષયવર્જિતા ।
ક્ષરાક્ષરમયી રક્ષા દક્ષિણામૂર્તિરૂપિણી ॥ ૫૯॥

મદિરાસ્વાદરસિકા મતઙ્ગકુલનાયિકા ।
મન્દારકુસુમાપીડા માતઙ્ગી મદહારિણી ॥ ૬૦॥

કલ્પાન્તસાક્ષિણી કામા કલ્પનાકલ્પનક્ષમા ।
સઙ્કલ્પનિર્મિતાશેષભુવના ભુવનેશ્વરી ॥ ૬૧॥

ભવ્યા ભવાર્ણવતરિર્ભાવારૂઢા ભયાપહા ।
રહસ્યયોગિની પૂજ્યા રહોગમ્યા રમાર્ચિતા ॥ ૬૨॥

અન્તર્વદનસન્દૃશ્યા સન્તતધ્યાનદીપિતા ।
કન્દલત્પ્રીતિહૃદયા કમલા કર્મસાક્ષિણી ॥ ૬૩॥

કાન્તાર્ધદેહા દીપ્યન્તી કાન્તિધૂતજપાછવિઃ ।
હૃદયાકાશતરણિર્હ્રીંકારી હૃષ્ટમાનસા ॥ ૬૪॥

હ્રીમતી હૃદયાકાશજ્યોત્સ્ના હાર્દતમોઽપહા ।
પરાપરરહસ્યાખ્યસર્વાનન્દમયેશ્વરી ॥ ૬૫॥

સર્વસિદ્ધિપ્રદાઽઽરૂઢાતિરહસ્યાધિદેવતા ।
રહસ્યયોગિની ક્ષેત્રસર્વરોગહરાધિપા ॥ ૬૬॥

નિગર્ભયોગિન્યાવાસસર્વરક્ષાકરેશ્વરી ।
સર્વાર્થસાધકભ્રાજત્કુલોત્તીર્ણાભિવન્દિતા ॥ ૬૭॥

સૌભાગ્યસત્સમ્પ્રદાયયોગિનીપરિપૂજિતા ।

ક્ષોભણોદ્ઘદ્ગુપ્તતરયોગિનીગણસેવિતા ॥ ૬૮॥

આશાપરીપૂરકાત્તગુપ્તયોગિન્યભિષ્ટુતા ।
ત્રૈલોક્યમોહનસ્થપ્રકટયોગિન્યુપાસિતા ॥ ૬૯॥

કલાતિથિનિધીષ્વિન્દુવર્ણમન્ત્રસ્વરૂપિણી ।
ગુણરેખાગ્નિવૃત્તાન્તર્નૃપનાગદલાલયા ॥ ૭૦॥

મુનિદિક્પઙ્ક્તિવસુભૂકોણાન્તર્બિન્દુવાસિની ।
વેદર્તુદિક્સૂર્યકલાદસ્રપત્રાબ્જચક્રગા ॥ ૭૧॥

મૃણાલતન્તુસદૃશી સુષમાવાસિની વસુઃ ।
સદાઽઽરાધ્યા સદાધ્યેયા સત્સઙ્ગતિરનુત્તમા ॥ ૭૨॥

પીયૂષરસસંસ્રાવસન્તર્પિતજગત્ત્રયી ।
સન્તતિસ્સન્તતિચ્છેદહારિણી ધારણા ધરા ॥ ૭૩॥

સ્વાહાકારા હવિર્ભોક્ત્રી યજમાનાકૃતિઃ કૃતિઃ ।
પિતૃપ્રસૂ પ્રસૂઃ પદ્મા સ્વયમ્ભૂરાત્મભૂરભૂઃ ॥ ૭૪॥

ત્ર્યક્ષરી ત્રિગુણાતીતા ક્લીઙ્કારી ક્લમહારિણી ।
પ્રસાદરૂપા પદવી પરા પ્રાસાદરૂપિણી ॥ ૭૫॥

શર્વાણી શર્મદા ધાત્રી ધર્મરૂપા પરાગતિઃ ।
મુઞ્જકેશી મુક્તસઙ્ગા પઞ્ચયજ્ઞપરાકૃતિઃ ॥ ૭૬॥

ષટ્ત્ર્યેકકર્મનિરતજનરક્ષણદીક્ષિતા ।
સ્વીકૃતાનુગ્રહકલા દૂરસ્થાપિતનિગ્રહા ॥ ૭૭॥

નિરન્તરસુખા ગૌરી નીપારણ્યનિવાસિની ।
મોક્ષદેશાનમહિષી લક્ષ્યાલક્ષ્યસ્વરૂપિણી ॥ ૭૮॥

રાજસી કમલાવાસા બ્રાહ્મી સૃષ્ટિવિધાયિની ।
સત્ત્વાઢ્યા વૈષ્ણવી પાત્રી તામસી રુદ્રરૂપિણી ॥ ૭૯॥

હન્ત્રીશ્વરી તિરોધાનકારિણી બહુરૂપિણી ।
સદાશિવાનુગ્રહદા સદાશિવમયી મતિઃ ॥ ૮૦॥

અખણ્ડૈકરસાનન્દતનુઃ પીયૂષરૂપિણી ।
ઐઙ્કારસ્યન્દિતત્ત્વાખ્યવિશ્વેન્દ્રિયફલપ્રદા ॥ ૮૧॥

આનન્દાજ્યાહુતિપ્રીતા ભક્તિજ્ઞાનપ્રદાયિની ।
ત્રિમુદ્રિણી ભગારાધ્યા પરનિર્વાણરૂપિણી ॥ ૮૨॥

સર્વભૂતહિતા વાણી બ્રહ્મરન્ધ્રનિવાસિની ।
તટિત્કોટિસમચ્છાયા સર્વવિદ્યાસ્વરૂપિણી ॥ ૮૩॥

મહાપદ્માટવીસંસ્થા કારણાનન્દવિગ્રહા ।
સિદ્ધલક્ષ્મીર્મહાલક્ષ્મીઃ રાજ્યલક્ષ્મીઃ પરાઙ્કુશા ॥ ૮૪॥

છન્દોમયી ચતુષ્ષષ્ટિકલાકાવ્યાર્થદર્શિની ।
ઐઙ્કારિણી કાલરૂપાઽણિમાદિકફલપ્રદા ॥ ૮૫॥

મહોરૂપા મહાયોગિન્યમલા ભૂતિદા કલા ।
કૂટત્રયમયી મૂલમન્ત્રરૂપા મનોન્મની ॥ ૮૬॥

બન્ધકાસુરસંહર્ત્રી કન્યકારૂપધારિણી ।
મહાબિલગુહાલીના મહામુનિમનોનટી ॥ ૮૭॥

શ‍ૃઙ્ગારમૂર્તિઃ સમ્રાજ્ઞી શ‍ૃઙ્ગારરસનાયિકા ।
ભદ્રાકૃતિઃ કાન્તિમયી ભદ્રદા ભક્તવત્સલા ॥ ૮૮॥

મહાબલા મહાનન્દા મહાભૈરવમોહિની ।
સૌભાગ્યદાયિની સ્વામિન્યુદગ્રા સમ્પ્રદાયિની ॥ ૮૯॥

ગોમતી ગુહ્યનિલયા ગુહ્યમૂર્તિર્ગુણાસ્પદા ।
વિવેકદાયિની શિષ્ટાશિષ્ટચેતોનિવાસિની ॥ ૯૦॥

કાત્યાયની કામકોટિરન્નપૂર્ણાઽભયઙ્કરી ।
શાકિની શામ્ભવી ભદ્રા ભૈરવી ભારતીમયી ॥ ૯૧॥

અભ્યાસસાધ્યા જયદા વિજયા ભગમાલિની ।
રુક્મિણી રુક્મસચ્છાયરોચનાતિલકોજ્જ્વલા ॥ ૯૨॥

વેદાન્તમૃગ્યચરણા જરામૃત્યુભયાપહા ।
કાન્તિઃ કામકલા કાન્તા વિધુમણ્ડલવાસિની ॥ ૯૩॥

શમ્ભુલોચનપીયૂષવર્તિરાર્તિનિવારિણી ।
વિઘ્નકાદમ્બિનીવાત્યા સર્વપ્રાણિમયી સ્મૃતિઃ ॥ ૯૪॥

લોકહન્ત્રી લોકભર્ત્રી ભોગકર્ત્રી પરાત્પરા ।
વીરપ્રિયા વીતરાગા નાશિતાશેષવૈકૃતિઃ ॥ ૯૫॥

નમજ્જનાહ્લાદિકરી નાદબ્રહ્મસ્વરૂપિણી ।
વિપ્રાધીના વિપ્રરૂપા વિપ્રજિહ્વાવિહારિણી ॥ ૯૬॥

વિપ્રારાધ્યા વિપ્રગણપૂજાતુષ્ટા વિયન્મયી ।
અવ્યાહતાજ્ઞા જનની જયિની પ્રણવાત્મિકા ॥ ૯૭॥

કામરૂપા કલાલાપા ભાર્ગવી જગદીશ્વરી ।
વિમાનસ્થા માનવતી નિત્યતૃપ્તજનપ્રિયા ॥ ૯૮॥

પરા વિભૂતિઃ સર્વજ્ઞાનાદિબોધા દયાનિધિઃ ।
અનન્તશક્તિરચલા પ્રણતપ્રિયબાન્ધવા ॥ ૯૯॥

અનાદિરખિલાધારા સચ્ચિદાનન્દરૂપિણી ।
સર્વોપનિષદુદ્ઘુષ્ટવૈભવા સર્વમઙ્ગલા ॥ ૧૦૦॥

ઇતિ તે કથિતં સ્તોત્રં નામસારાત્મકં મયા ।
સર્વસૌભાગ્યદં દેવિ સર્વૈશ્વર્યપ્રદાયકમ્ ॥ ૧૦૧॥

આયુષ્કરં પુષ્ટિકરં તુષ્ટિદં પુરુષાર્થદમ્ ।
સાહિત્યવૈશદ્યકરં વિશેષાદૃષ્ટદં નૃણામ્ ॥ ૧૦૨॥

વિદ્યાપ્રદં પુત્રકરં સર્વસમ્પત્પ્રદાયકમ્ ।
ય ઇદં પ્રપઠેદ્વિદ્વાંસ્ત્રિવારં પ્રતિવાસરમ્ ॥ ૧૦૩॥

ગઙ્ગાયાં ચ કુરુક્ષેત્રે તથાન્યાસુ નદીષુ ચ ।
ઉપરાગે પુષ્પવતોર્દ્વિમુખીશતદાનતઃ ॥ ૧૦૪॥

પૃથક્ફલં યદ્ધર્મસ્ય સ તત્ફલમવાપ્નુયાત્ ।
બ્રહ્મહત્યાદિ પાપાનિ નશ્યન્ત્યસ્ય જપાત્પ્રિયે ॥ ૧૦૫॥

સ્તવોઽપ્યન્યશ્ચ નાસ્ત્યેવ નામપઞ્ચશતીસમઃ ।
તસ્માત્ત્વમપિ પદ્માક્ષિ સ્તવેનાનેન નિત્યશઃ ॥ ૧૦૬॥

કામાક્ષીં પરમેશાનીં સ્તુહિ શ્રદ્ધાસમન્વિતા ।
સ્તુતા ત્વયા મહેશાની મહાશક્તિઃ પરાત્પરા ॥ ૧૦૭॥

શૃઙ્ગારનાયિકા લક્ષ્મીઃ કરુણારૂપિણી શિવા ।
શ્રીમાતા દેવિ કામાક્ષી તવાભીષ્ટાનિ દાસ્યતિ ॥ ૧૦૮॥

॥ ઇતિ ચતુર્લક્ષગ્રન્થવિસ્તારેશ્રીસૌભાગ્યલક્ષ્મીકલ્પે

મોક્ષપાદે શ્રીકમલાકમલાક્ષસંવાદે નામસારસ્તવાખ્યં
શ્રીકામાક્ષીપઞ્ચશતીસ્તોત્રમ્ ॥

પરિશિષ્ટઃ ।
કારણપરચિદ્રૂપા કાઞ્ચીપુરસીમ્નિ કામપીઠગતા ।
કાચન વિહરતિ કરુણા કાશ્મીરસ્તબકકોમલાઙ્ગલતા ॥

કઞ્ચન કાઞ્ચીનિલયં કરધૃતકોદણ્ડબાણસૃણિપાશમ્ ।
કઠિનસ્તનભરનમ્રં કૈવલ્યાનન્દકન્દમવલમ્બે ॥

ઐશ્વર્યમિન્દુમૌલેઃ ઐકાત્મ્યપ્રકૃતિકાઞ્ચિમધ્યગતમ્ ।
ઐન્દવકિશોરશેખરમૈદમ્પર્યં ચકાસ્તિ નિગમાનામ્ ॥

કામપરિપન્થિકામિનિ કામેશ્વરિ કામપીઠમધ્યગતે ।
કામદુઘા ભવ કમલે કામકલે કામકોટિ કામાક્ષિ ॥

લીયે પુરહરજાયે માયે તવ તરુણપલ્લવચ્છાયે ।
ચરણે ચન્દ્રાભરણે કાઞ્ચીશરણે નતાર્તિસંહરણે ॥

જય જય જગદમ્બ શિવે જય જય કામાક્ષિ જય જયાદ્રિસુતે ।
જય જય મહેશદયિતે જય જય ચિદ્ગગનકૌમુદીધારે ॥

ઇતિ શ્રીકામાક્ષીપઞ્ચશતીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Kamakshi Panchashati Stotram*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*